# Naradaproktam Vishnunamavali

# નારદપ્રોક્તં વિષ્ણુનામાવલિઃ

## Document Information

Text title : Naradaproktam Vishnunamavali

File name : nAradaproktaMviShNunAmAvaliH.itx

Category : vishhnu, vishnu, mahAbhArata, nAmAvalI

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | shAntiparva | adhyAya 325/4||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 15, 2025

*sanskritdocuments.org*

# નારદપ્રોક્તં વિષ્ણુનામાવલિઃ

નારદ ઉવાચ ।
નમસ્તે દેવદેવ ૧ નિષ્ક્રિય ૨ નિર્ગુણ ૩ લોકસાક્ષિન્ ૪ ક્ષેત્રજ્ઞ ૫ ॥

અનન્ત ૬ પુરુષ ૭ મહાપુરુષ ૮ ત્રિગુણ ૯ પ્રધાન ૧૦ અમૃત ૧૧ ॥

વ્યોમ ૧૨ સનાતન ૧૩ સદસદ્વ્યક્તાવ્યક્ત ૧૪ ઋતધામન્ ૧૫ પૂર્વાદિદેવ ૧૬ ॥

વસુપ્રદ ૧૭ પ્રજાપતે ૧૮ સુપ્રજાપતે ૧૯ વનસ્પતે ૨૦ મહાપ્રજાપતે ૨૧ ॥

ઊર્જસ્પતે ૨૨ વાચસ્પતે ૨૩ મનસ્પતે ૨૪ જગત્પતે ૨૫ દિવસ્પતે ૨૬ ॥

મરુત્પતે ૨૭ સલિલપતે ૨૮ પૃથિવીપતે ૨૯ દિક્પતે ૩૦ પૂર્વનિવાસ ૩૧ ॥

બ્રહ્મપુરોહિત ૩૨ બ્રહ્મકાયિક ૩૩ મહાકાયિક ૩૪ મહારાજિક ૩૫ ॥

ચતુર્મહારાજિક ૩૬ આભાસુર ૩૭ મહાભાસુર ૩૮ સપ્તમહાભાસુર ૩૯ ॥

યામ્ય ૪૦ મહાયામ્ય ૪૧ સંજ્ઞાસંજ્ઞ ૪૨ તુષિત ૪૩ મહાતુષિત ૪૪ ॥

પ્રતર્દન ૪૫ પરિનિર્મિત ૪૬ વશવર્તિન્ ૪૭ અપરિનિર્મિત ૪૮ યજ્ઞ ૪૯ ॥

મહાયજ્ઞ ૫૦ યજ્ઞસમ્ભવ ૫૧ યજ્ઞયોને ૫૨ યજ્ઞગર્ભ ૫૩ યજ્ઞહૃદય ૫૪ ॥

યજ્ઞસ્તુત ૫૫ યજ્ઞભાગહર ૫૬ પઞ્ચયજ્ઞધર ૫૭ પઞ્ચકાલકર્તૃગતે ૫૮ ॥

પઞ્ચરાત્રિક ૫૯ વૈકુણ્ઠ ૬૦ અપરાજિત ૬૧ માનસિક ૬૨ પરમસ્વામિન્ ૬૩ ॥

સુસ્નાત ૬૪ હંસ ૬૫ પરમહંસ ૬૬ પરમયાજ્ઞિક ૬૭ સાઙ્ખ્યયોગ ૬૮ ॥

અમૃતેશય ૬૯ હિરણ્યેશય ૭૦ વેદેશય ૭૧ કુશેશય ૭૨ બ્રહ્મેશય ૭૩ ॥

પદ્મેશય ૭૪ વિશ્વેશ્વર ૭૫ ત્વં જગદન્વયઃ ૭૬ ત્વં જગત્પ્રકૃતિઃ ૭૭ ॥

તવાગ્નિરાસ્યં ૭૮ વડવામુખોઽગ્નિઃ ૭૯ ત્વમાહુતિઃ ૮૦ ત્વં સારથિઃ ૮૧ ॥

ત્વં વષટ્કારઃ ૮૨ ત્વમોઙ્કારઃ ૮૩ ત્વં મનઃ ૮૪ ત્વં ચન્દ્રમાઃ ૮૫ ॥

ત્વં ચક્ષુરાદ્યં ૮૬ ત્વં સૂર્યઃ ૮૭ ત્વં દિશાં ગજઃ ૮૮ દિગ્ભાનો ૮૯ ॥

હયશિરઃ ૯૦ પ્રથમત્રિસૌપર્ણ ૯૧ પઞ્ચાગ્ને ૯૨ ત્રિણાચિકેત ૯૩ ॥

ષડઙ્ગવિધાન ૯૪ પ્રાગ્જ્યોતિષ ૯૫ જ્યેષ્ઠસામગ ૯૬ સામિકવ્રતધર ૯૭ ॥

અથર્વશિરઃ ૯૮ પઞ્ચમહાકલ્પ ૯૯ ફેનપાચાર્ય ૧૦૦ વાલખિલ્ય ૧૦૧ ॥

વૈખાનસ ૧૦૨ અભગ્નયોગ ૧૦૩ અભગ્નપરિસઙ્ખ્યાન ૧૦૪ યુગાદે ૧૦૫ ॥

યુગમધ્ય ૧૦૬ યુગનિધન ૧૦૭ આખણ્ડલ ૧૦૮ પ્રાચીનગર્ભ ૧૦૯ ॥

કૌશિક ૧૧૦ પુરુષ્ટુત ૧૧૧ પુરુહૂત ૧૧૨ વિશ્વરૂપ ૧૧૩ અનન્તગતે ૧૧૪ ॥

અનન્તભોગ ૧૧૫ અનન્ત ૧૧૬ અનાદે ૧૧૭ અમધ્ય ૧૧૮ અવ્યક્તમધ્ય ૧૧૯ ॥

અવ્યક્તનિધન ૧૨૦ વ્રતાવાસ ૧૨૧ સમુદ્રાધિવાસ ૧૨૨ યશોવાસ ૧૨૩ ॥

તપોવાસ ૧૨૪ લક્ષ્મ્યાવાસ ૧૨૫ વિદ્યાવાસ ૧૨૬ કીર્ત્યાવાસ ૧૨૭ ॥

શ્રીવાસ ૧૨૮ સર્વાવાસ ૧૨૯ વાસુદેવ ૧૩૦ સર્વચ્છન્દક ૧૩૧ ॥

હરિહય ૧૩૨ હરિમેધ ૧૩૩ મહાયજ્ઞભાગહર ૧૩૪ વરપ્રદ ૧૩૫ ॥

યમનિયમમહાનિયમકૃચ્છ્રાતિકૃચ્છ્ર-
મહાકૃચ્છ્રસર્વકૃચ્છ્રનિયમધર ૧૩૬ ॥

નિવૃત્તધર્મપ્રવચનગતે ૧૩૭ પ્રવૃત્તવેદક્રિય ૧૩૮ અજ ૧૩૯ ॥

સર્વગતે ૧૪૦ સર્વદર્શિન્ ૧૪૧ અગ્રાહ્ય ૧૪૨ અચલ ૧૪૩ મહાવિભૂતે ૧૪૪ ॥

માહાત્મ્યશરીર ૧૪૫ પવિત્ર ૧૪૬ મહાપવિત્ર ૧૪૭ હિરણ્મય ૧૪૮ ॥

બૃહતે ૧૪૯ અપ્રતર્ક્ય ૧૫૦ અવિજ્ઞેય ૧૫૧ બ્રહ્માગ્ર્ય ૧૫૨ પ્રજાસર્ગકર ૧૫૩ ॥

પ્રજાનિધનકર ૧૫૪ મહામાયાધર ૧૫૫ ચિત્રશિખણ્ડિન્ ૧૫૬ ॥

વરપ્રદ ૧૫૭ પુરોડાશભાગહર ૧૫૮ ગતાધ્વરછિન્નતૃષ્ણ ૧૬૦ ॥

છિન્નસંશય ૧૬૧ સર્વતોનિવૃત્ત ૧૬૨ બ્રાહ્મણરૂપ ૧૬૩ બ્રાહ્મણપ્રિય ૧૬૪ ॥

વિશ્વમૂર્તે ૧૬૫ મહામૂર્તે ૧૬૬ બાન્ધવ ૧૬૭ ભક્તવત્સલ ૧૬૮ ॥

બ્રહ્મણ્યદેવ ૧૬૯ ભક્તોઽહં ત્વાં દિદૃક્ષુઃ ૧૭૦
એકાન્તદર્શનાય નમો નમઃ ॥ ૧૭૧ ॥ ૪ ॥

ઇતિ મહાભારતે શાન્તિપર્વણિ ૩૨૫ અધ્યાયાન્તર્ગતં

નારદપ્રોક્તં વિષ્ણુનામાવલિઃ સમ્પૂર્ણા ।

મહાભારત । શાન્તિપર્વ । અધ્યાય ૩૨૫/૪॥

mahAbhArata . shAntiparva . adhyAya 325/4..

Proofread by PSA Easwaran

*Naradaproktam Vishnunamavali*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*